# 22 अभ्यासार्थ प्रश्न एवं उनके उत्तर

(बिहार बोर्ड, उ०प्र० बोर्ड, राजस्थान बोर्ड एवं C.B.S.E के लिए)

निर्देशानुसार उत्तर लिखें और स्वयं मूल्यांकन करें। उपान्त के अंक पूर्णांक के द्योतक हैं। कृपया अपने उत्तर साफ-साफ एवं सुन्दर अक्षरों में लिखें।

1. अधोलिखित पदेषु प्रयुक्तमुपसर्गाः लिखत्— 4
   (a) दुर्लभते (b) उत्तिष्ठतु (c) निर्वृत्तिः (d) अवरोहति
2. (क) अधोलिखिखितेषु पदेषु संधि-विच्छेदं कृत्वा संधेः नामापि लेखनीयम्—
   (a) उज्ज्वलः (b) दिगम्बरः (c) हरिं वन्दे
   (ख) अधोलिखितेषु पदेषु संधिं कृत्वा तस्य नामापि लिखत— 4
   (a) धनुः + टंकारः (b) रामः + अयम् (c) मनः + हरः
3. (क) निम्नलिखितयोः सामासिकपदयोः संस्कृते समासविग्रहं कृत्वा समासस्य नाम लिखत— 2
   (a) उपकृष्णम् (b) चन्द्रशेखरः
   (ख) निम्नलिखितयोः समासविग्रहयोः संस्कृते सामासिक पदं कृत्वा समासस्य नाम लिखत— 2
   (a) माता च पिता च (b) ग्रामं गतः
4. रेखांकितयोः पदयोः प्रयुक्त विभक्तिं तत् कारणं च लिखत— 2
   (a) <u>राजमार्गम्</u> अभितः वृक्षाः सन्ति।
   (b) साधुः <u>पादेन</u> खञ्जः अस्ति।
5. निम्नलिखितयोः शब्दयोः प्रकृतिं प्रत्ययं च लिखत— 2
   (a) पठन्ती (b) कर्त्तव्यः
6. धातु प्रत्ययं च संयोज्य पदरचनां कुरुत— 2
   (a) भक्ति + मतुप् (b) कृ + क्तिन्
7. निर्देशानुसारं शब्द रूपाणि लिखत— 3
   (a) हरि तृतीया एकवचने
   (b) युष्मद् सप्तमी बहुवचने
   (c) यत् स्त्री० षष्ठी द्विवचने
8. निम्नलिखितेषु क्रियापदेषु धातु-लकार-पुरुष-वचनानि लिखत—
   (a) इच्छेयम् (b) नर्तिष्यन्ति (c) सेवध्वे
9. केषां वर्णानाम् उच्चारणस्थानं तालुः अस्ति? 2
10. निम्नलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत— 2
    (a) एक सौ पन्द्रह (115) (b) दो सौ इकत्तीस (231)
11. (a) 'लभन्ते' इत्यस्य कोऽर्थः? 1
    (b) 'वर्तते' इत्यस्य कोऽर्थः? 1

www.classroomnotes.in

12. उदाहरणानुसारं पर्यायवाचिपदानि लिखत— 4

उदाहरणम् प्रश्न—'विशालम्' इत्यस्य पर्यायपदम् किम् ?
उत्तर—'विशालम्' इत्यस्य 'विपुलम्' पर्यायपदम् ।

(a) 'सरोवरः' इत्यस्य पर्यायपदम् किम् ?
(b) 'वृथा' इत्यस्य पर्यायपदम् किम् ?
(c) 'भार्या' इत्यस्य पर्यायपदम् किम् ?
(d) 'जननी' इत्यस्य पर्यायपदम् किम् ?

13. अधोनिर्दिष्टानां पदानां स्ववाक्येषु प्रयोगं कुरुत— 10

(a) गच्छन्ति (b) वर्तते (c) दृष्ट्वा (d) तूष्णीम्
(e) रिपुः (f) जनाः (g) उभयतः (h) अस्माकम्
(i) अद्यैव (j) सूर्योदयात्

14. अधोलिखित स्तम्भद्वये प्रदत्तपदानां समुचित विलोम पदैः सह मेलनं कृत्वा लिखत— 7

| स्तम्भ 'क' | स्तम्भ 'ख' |
|---|---|
| (a) प्रयोजनम् | (i) अप्रसन्नता |
| (b) प्रसन्नता | (ii) निष्प्रयोजनम् |
| (c) संस्काराः | (iii) आनयनम् |
| (d) अपनयनम् | (iv) विस्मर्यते |
| (e) स्मर्यते | (v) कुसंस्काराः |
| (f) वरिष्ठानाम् | (vi) गुणापनयनम् |
| (g) गुणाधानम् | (vii) कनिष्ठानाम् |

15. निम्नांकित प्रकृति प्रत्ययानां योगं कृत्वा पदानि प्रदर्शयत— 15

(a) सम् + कृ + घञ् (b) अभि + ज्ञा + ल्युट्
(c) निस् + क्रम् + ल्युट् (d) उत् + नी + ल्युट्
(e) आङ् + धा + ल्युट् (f) पाल् + णिच् + शतृ
(g) प्रसन्न + तल् + टाप् (h) सम् + आङ् + विश् + क्त
(i) प्र + विश् + घञ् (j) उप् + दिश् + ल्यप्
(k) उत् + कृष् + क्त (l) मूल + ठक्
(m) पठ् + घञ् (n) कृ + क्तवतु
(o) कृ + क्त्वा

16. निम्नांकितपदानां विग्रहं कृत्वा समासनामानि लिखत— 18

(a) कर्मवीरः (b) निर्जोत्साहेन (c) विहारराज्यस्य
(d) नवीनदृष्टि सम्पन्नः (e) क्लिष्टजीवनाः (f) दलितबालकम्
(g) अकृतकालक्षेपः (h) पुरुषसिंहम् (i) शिक्षाविहीना
(j) कुत्सितरीतयः (k) अव्यापकता (l) धर्मोद्धारकाः
(m) वैषम्यनिवारकाः (n) अकिञ्चित्करः (o) मूर्तिपूजा
(p) धर्माडम्बरः (q) प्रज्ञाचक्षुषः (r) जातिवादकृतम्

www.classroomnotes.in

**17. अधोलिखितानां पदानां प्रकृति-प्रत्ययविभागं लिखत—** 11

(a) स्नातः (b) प्रसार्य (c) दातव्यम् (d) स्नात्वा
(e) पलायितुम (f) उक्त्वा (g) चिन्तयन् (h) मृतः
(i) सम्प्राप्त (j) उपगम्य (k) धृतः

**18. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत—** 5

**(च, एव, अपि, यदि, इव)**

(a) ------ न वक्ष्ये मूढ़ इति मां परिभवति।
(b) एष ------- अस्य कामः।
(c) सूर्यः ------ तिष्ठतु ते यशः।
(d) इदं देवासुरैः ------- न भेद्यम्।
(e) जलं जलस्थानगतं ------- शुष्यति।

**19. संधि-विच्छेदं कुरुत—** 20

1. पूषन्नपावृणु 2. जन्तोर्निहितः 3. नानृतं
4. ह्याप्तकामा 5. पुरुषमुपैति 6. गङ्गायास्तीरे
7. कालान्तरेण 8. अत्युत्कृष्टासीदिति 9. अन्नोपवर्षवर्षाविह
10. पाणिनिपिङ्गलाविह 11. उत्सवाश्च 12. नगरेऽस्मिन्
13. पतनेति 14. निर्गतः 15. किञ्च
16. इत्येते 17. अद्यावधि 18. दुर्गतिभ्योऽनाथेभ्यश्च
19. अलसेभ्योऽप्यन्नवस्त्रे 20. ततोऽलसपुरुषाणाम्

**20. शुद्धं कुरुत—** 20

1. त्रयः स्त्रियः गच्छन्ति। 2. तं पुस्तकं देहि।
3. सा गृहं गतः। 4. भगवतस्य कृपा अस्ति।
5. सः व्याघ्रेण बिभेति। 6. सीता अतीव सुन्दरः आसीत्।
7. रामश्यामौ गच्छति। 8. चत्वारः फलानि सन्ति।
9. पुत्रस्य सह पिता गच्छति। 10. चत्वारि बालिकाः पठन्ति।
11. द्वौ फले पततः। 12. सा पाराणस्यां दृष्टम्।
13. वधूः श्वशुरं जिह्वेति। 14. तया फलं खादतः।
15. त्वया चन्द्रं दृश्यते। 16. मम मने चिन्ता अस्ति।
17. रामः अस्माकम् मित्रः अस्ति। 18. इदं समुद्रम् अस्ति।
19. इयं शकुन्तला सीता च सन्ति। 20. अष्टानि फलानि सन्ति।

**21. संस्कृते सम्भाषणम् लिखत—** 5×9 = 45

(i) वैद्य-रोगी सम्भाषणम् (ii) क्रीडाविषये सम्भाषणम्
(iii) कक्ष्यायां छात्राणां सम्भाषणम् (iv) माता-पुत्रयोः सम्भाषणम्
(v) गुरुशिष्ययोः संवादः (vi) उद्याने वार्तालापः
(vii) पर्यावरणस्य रक्षणम् (viii) नगर-भ्रमणम्
(ix) नवीन मित्रस्य परिचयः

www.classroomnotes.in

**22. पत्राणि लिखत—** 5×5=25

**(राजस्थान बोर्ड एवं C.B.S.E)**

(i) स्वमात्रे संस्कृते पत्रं लिखत।

(ii) स्वच्छता-सम्पादनार्थम् नगरपालिका प्रशासकाय संस्कृते पत्रं लिखत।

(iii) स्वं 'अभिनवं' मत्वा राजकीय उच्च माध्यमिक विद्यालय:जयपुरस्य प्रधानाचार्यं महोदयं द्विदिवसयोः अवकाशार्थम् पत्रं लिखत। (राजस्थान बोर्ड–2007)

(iv) स्वं 'अभिषेकं' मत्वा, राजस्थान संस्कृत अकादमी, जयपुरस्य निदेशकं महोदयं पुस्तक-प्रेषणार्थं पत्रं लिखत। (राजस्थान बोर्ड–2007)

(v) स्वं 275 बी रामनगरं अलवस्य विवेकानन्दं मत्वा स्व अध्ययनस्य विवरणं दत्वा स्वपित्रे पत्रं लिखत। (राजस्थान बोर्ड–2008)

**23. अधोलिखित गद्यांशं पठित्वा एतदाधारित प्रश्नानामुत्तराणि यथानिर्देशं संस्कृत माध्यमेन लिखत— (राजस्थान बोर्ड एवं CBSE)** 10×3=30

(क) अस्माकं राजस्थानं वीराणां जनकं वर्तते। त्यागेन बलिदानेन च पूता अस्य भूमिः प्रणम्या। कवयः अपि काव्येषु अस्य गौरव गीतानि गायन्ति। राजस्थानस्य वीराणां देशरक्षायै स्वाभिमानं रक्षयितुञ्च कृतमात्मोत्सर्गं संगर्वं वदन्ति इतिहासविदः। राजस्थानस्य सभ्यतायाः उद्भवः विकासश्च अतिप्राचीनो वर्तते। कालीबंगा आहाड़ादि स्थानेषु कृतेन उत्खनेन अस्याः सभ्यतायाः अस्तित्वं मोहनजोदड़ो हड़प्पादि सभ्यतानां समकालिकं सिध्यति। पुरातात्विक साक्ष्यैः सिध्यति यत् लक्षवर्षेभ्यः प्राक् राजस्थानस्य दक्षिणभागे च बनास गम्भीरी बेड़चादि नदीनां च तटेषु निवासिनो मानवाः प्रस्तरयुगस्य आयुधैः मृगयां कुर्वन्ति स्म। प्रस्तरसभ्यताया चिह्नानि चर्मण्वत्यादि नदीनां समीपे समुपलब्धानि। ऋग्वेदानुसारं राजस्थानीय गंगानगर मण्डलस्य पूर्वस्यां सीमायां दृष्वती सरित् वहति स्म। प्रतीच्यां च सरस्वती नदी अवहत्। तस्मिन् समये अयं भूभागः ब्रह्मावर्त नाम्ना कथ्यते स्म। पाषाण युगस्य तिसृणां संस्कृतिनां बोधः प्रामुख्येन भवति।

(अ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(ब) उपर्युक्त गद्यांशस्य संक्षिप्तीकरणं कुरुत।

(स) (i) अस्माकं राजस्थानं केषां जनकं वर्तते?

(ii) राजस्थानस्य सभ्यता कस्य सभ्यताया समकालिकं सिध्यति?

(iii) लक्ष वर्षेभ्यः प्राक् राजस्थानस्य दक्षिणभागे काः नद्यः वहन्ति स्म?

(iv) नदीनां तटेषु निवासिनो मानवाः कस्य युगस्य आयुधैः मृगयां कुर्वन्ति स्म?

(v) प्रस्तर सभ्यतायाः चिह्नानि केषां नदीनाम् समीपे समुपलब्धानि?

(ख) दीपावली अस्माकं राष्ट्रियोत्सवः वर्तते। अस्मिन् उत्सवे सर्वे जनाः परस्परं भेदभावं विस्मृत्य आनन्दमग्नाः भवन्ति। त्रेतायुगे कैकेय्याः वरयाचनात् अयोध्यायाः राज्ञा दशरथेन रामाय चतुर्दशानां वर्षाणां वनवासः प्रदत्तः। श्रीरामः अस्मिन् एव दिने सीतालक्ष्मणाभ्यां सह अयोध्यां प्रत्यावर्तितवान्। तान स्वागतं व्याहर्तुम अयोध्यावासिनः नगरे सर्वत्र दीपान् प्रज्वलितवन्तः। तदा आरभ्य अद्यावधिः प्रतिवर्षं कार्तिकमासे अमावस्यायां तिथौ भारते दीपावली-महोत्सवः महता उत्साहेन आयोजितः भवति।

दीपावल्यां जनाः गृहाणि परिष्कुर्वन्ति। अस्मिन्नवसरे ते स्वमित्रेभ्यः बन्धुभ्यश्च उपहारान् यच्छन्ति, परस्परं अभिनन्दन्ति च। बालकेभ्यः मिष्टान्नं यच्छन्ति। सर्वे जनाः लक्ष्मीगणेशयोः पूजनं कुर्वन्ति। पितरः स्वसन्ततिभ्यः स्फोटनकानि ददति। अस्मिन् महोत्सवे सर्वे सर्वेभ्यः सुखाय समृद्धये च शुभेच्छा प्रकटयन्ति।

(अ) अस्य गद्यांशस्य समुचित शीर्षकं लिखत।

(ब) उपर्युक्त गद्यांशस्य 'संक्षिप्तीरकणं' कुरुत।

(स) (i) दीपावल्याः अवसरे जनाः किं विस्मृत्य आनन्दमग्नाः भवन्ति ?

(ii) राज्ञा दशरथेन कस्मै वनवासः कल्पितः आसीत् ?

(iii) दीपावल्याः अवसरे जनाः केभ्यः उपहारं यच्छन्ति ?

(iv) सर्वे सर्वेभ्यः किमर्थं शुभेच्छाः ज्ञापयन्ति ?

(v) श्रीरामः कस्मिन दिने अयोध्यां प्रत्यावर्तितवान् ?

(ग) इदं हि विज्ञानप्रधानं युगम्। 'विशिष्टं ज्ञानम् विज्ञानम्' इति कथ्यते। अस्यां शताब्दयां सर्वत्र विज्ञानस्यैव प्रभावो परिदृश्यते। अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साहाय्यं नापेक्ष्यते। आवागमने, समाचारप्रेषणे, दूरदर्शने, सम्भाषणे, शिक्षणे, चिकित्साक्षेत्रे, मनोरंजन कार्ये, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि, तथैवान्यकार्यकलापेषु विज्ञानस्य प्रभावस्तदपेक्षा च सर्वत्रैवानुभूयते।

सम्प्रति मानवः प्रकृतिं वशीकृत्य तां स्वेच्छया कार्येषु नियुङ्क्ते। तथाहि वैज्ञानिकैरनेके आविष्काराः विहिताः। मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविद्भिर्वा परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः। तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निर्घृणं च। अयं च न विज्ञानस्य दोषः न वा परमाणुशक्तेरपराधः पुरुषापराधः खलु एषः।

अतोऽस्य मानवकल्याणार्थमेव प्रयोगः करणीयः।

(अ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(ब) उपर्युक्त गद्यांशस्य संक्षिप्तीकरणं कुरुत।

(स) (i) इदं युगं कीदृशम् ?

(ii) विज्ञानम् किम् अस्ति।

(iii) कैः आविष्काराः विहिताः ?

(iv) परमाणुशक्तेः कस्मिन् उपयोगो विहितः ?

(v) का पुरुषापराधः ?

**24. हिन्दी भाषायाम् अनुवादं कुरुत—** 11× 5=55

(i) अस्माकं देशे कुम्भमेलानां बहुमहत्त्वम् अस्ति। देशस्य चतुर्षु स्थानेषु कुम्भमेलाः आयोज्यन्ते–प्रयागे, हरिद्वारे,उज्जयिन्यां, नासिके च। प्रत्येकस्मिन् नगरे द्वादशवर्षाणाम् अनन्तरम् एकः पूर्णकुम्भयोगः आयाति एवं वर्षत्रयस्य अनन्तरम् क्रमशः देशस्य एकैकस्मिन् स्थाने कुम्भमेला भवति। प्रत्येकस्मिन् नगरे षष्ठे वर्षे अर्द्धकुम्भयोगः अपि भवति। कुम्भमेला प्रायशः सार्धैकमासपर्यन्तं चलति। कुम्भमेलायां भागं ग्रहीतुं भारतवर्षस्य अनेकेभ्यः स्थानेभ्यः सामान्यजनाः, साधवः सन्तः च आगच्छन्ति।

(ii) नारी पुरुषस्य सहयोगिनी भवति, सा एव गृहस्वामिनी भवति। पत्न्या सह एव पुरुषः यज्ञं करोति अतएव पत्नी सहधर्मचारिणी अपि कथ्यते। सा पुरुषस्य 'अर्धाङ्गिनी' इत्यपि कथ्यते। रामस्य पत्नी सीता आसीत्। भगवतः विष्णोः पत्नी देवी लक्ष्मी अस्ति। शिवस्य पत्न्या नामं पार्वती अस्ति। महात्मागान्धिमहोदयस्य पत्नी कस्तूरबा आसीत्।

(iii) अहं प्रतिवर्षं पुष्करं गच्छामि। तत्र ब्राह्मणः मन्दिरं पश्यामि। सरोवरे स्नानं करोमि। पूजां च करोमि। मया सह मम मित्राणि अपि गच्छन्ति। ते अपि मन्दिराणि पश्यन्ति, स्नानं कुर्वन्ति, पूजां च कुर्वन्ति। गतवर्षे मया सह शिवः अपि पुष्करं गतवान्,

अन्ये अपि बहवः जनाः गतवन्तः। वयं मन्दिराणि दृष्टवन्तः, स्नानं कृतवन्तः, पूजां च कृतवन्तः। आगामिवर्षे अपि अहं पुष्करं गमिष्यामि, मन्दिराणि द्रक्ष्यामि, स्नानं करिष्यामि, पूजां च करिष्यामि।

(iv) अस्माकं देशस्य नाम भारतवर्षम् अस्ति। अयं भरतस्य देशः अस्ति अतः भारतनाम्ना प्रसिद्धः अस्ति। ऋषभस्य पुत्रः भरतः वीरः आसीत् तस्य नाम्ना अयं देशं 'भारत' इति अस्ति। भरतस्य कुले जाताः अपि भारताः। भारतानां देशः भारतः। शकुन्तला दुष्यन्तयोः पुत्रस्य नाम अपि भरतः आसीत्। सः अपि चक्रवर्ती सम्राट् आसीत्। प्रजानां भरणात् मनुः अपि 'भरत' उच्यते।

(v) नासिकं महाराष्ट्रप्रान्ते गोदावरीनद्याः तटे स्थितिम् अस्ति। अत्रैव पञ्चवटीस्थानम् अपि अस्ति। वनवासकाले रामः सीतालक्ष्मणाभ्यां सह पञ्चवट्याम् एव निवासं कृतवान्। समीपे एव गोदावरीनद्याः उद्गमस्थलम् अस्ति। तत्र 'त्रयम्बकेश्वरः इति नाम्ना प्रसिद्ध ज्योतिर्लिङ्गः अस्ति। अस्य स्थानस्य नाम अपि 'त्रयम्बकेश्वर' एव अस्ति। भारतवर्षे कुम्भमेलानां कुम्भनगराणां च सांस्कृतिकं महत्त्वम् अस्ति।

(vi) मेवाड़राज्यं बहूनां शूराणां जन्मभूमिः। बप्पारावलः, महाराणाकुम्भाः, महाराणा संग्रामसिंहः (सांगा), महाराणा उदयसिंहः इत्याद्यः क्रमशः मेवाडराज्यस्य राजानः आसन्। महाराणाप्रतापस्य जन्म विक्रमस्य 1597 तमे वर्षे (ईश्वीय 1540 तमे वर्षे) ज्येष्ठशुक्लतृतीयाम् अभवत्।

(vii) तदानीम् एव कश्चिद् वृद्धः पत्न्याः सह नदीपारं गन्तुम् नदीं प्रविष्टः, किन्तु महाप्रवाहेण प्रवाहितः। सः वृद्धः हाहाकारं कृत्वा नागरिकान् आकारितवान्–त्राहि माम्। भो भो महाजनाः। नदीप्रवाहः माम् मम पत्नीं च बलात् नयति। कोऽपि धार्मिकः सपत्नीकस्य मम जीवनरक्षां करोतु। परन्तु वृद्धस्य दीनध्वनिं श्रुत्वा सर्वेऽपि नगरजनाः सकौतुकं पश्यन्ति कोऽपि स्वस्थानात् न प्रचलति। कोऽपि जलमध्ये प्रविश्य वृद्धस्य, तस्य पत्न्याः च प्राणरक्षां न करोति।

(viii) प्राचीनकाले भारतवर्षे मगधजनपदे नन्दवंशस्य साम्राज्यम् आसीत्। मगधसाम्राज्यस्य राजधानी पाटलिपुत्रम् आसीत्। अस्मिन् साम्राज्ये बुद्धिमन्तः मन्त्रिणः, कर्त्तव्यनिष्ठाः कर्मचारिणः, गुणवन्तः पण्डिताः, शक्तिमन्तः सैनिकाः च आसन्। नगरस्य वैभवम् अपि उत्कृष्टम् आसीत्। राज्ये उत्तमं कृषिकार्यं प्रचलति स्म। अतः नागरिकाः धनिकाः आसन्। शिक्षणव्यवस्था अपि अत्युत्कृष्टा आसीत्। अस्मिन् एव राज्ये विश्वप्रसिद्धः नालन्दाविश्वविद्यालयः आसीत्। राज्ये बहूनि वर्षाणि यावत् शासनव्यवस्था उत्तमरीत्या प्राचलत्। अनन्तरं नन्दवंशे समुत्पन्नः घनानन्दः राजा अभवत्। सः परमस्वार्थी इन्द्रियासक्तः च आसीत्। राज्यकार्ये तस्य रुचिः न आसीत्। अतएव मगधराज्यं समस्याग्रस्तं जातम्। तस्मात् सर्वे नागरिकाः चिन्तिताः अभवन्।

(ix) अन्ते च पादे असावधानतया धनुषः प्रत्यञ्चाघातेन प्रतापः अस्वस्थः जातः। इशवीये 1597 तमे वर्षे जनवरीमासस्य 19 दिनांके प्रतापः दिवङ्गतः। प्रतापः महान् सेनानायकः, जननायकः, व्यवस्थापकः, सङ्घटनकर्ता च आसीत्। सः स्वस्थ आचरणेन स्वसैनिकान् कर्तव्यारुढान्, प्रजाजनान् निर्भयान् स्वशौर्येण शत्रून् भयातुरान् च कृतवान्। अधुना अपि भारतवासिनः प्रतापस्य शौर्यगीतानि गायन्ति।

(x) तदा विक्रमः तस्य अभयं दत्वा नदीजले प्रविश्य पत्न्या सह तं वृद्धं महाप्रवाहात् आकृष्य तटम् आनीतवान्। वृद्धः अपि स्वस्थः भूत्वा विक्रमम् अवदत्–'भो महासत्त्व! मम

एतत शरीरं मम मातृ-पितृभ्याम् उत्पादितम्, इदानीं भवतः सकाशात् द्वितीयं जन्म प्राप्तम्, अतः त्वं मया उपार्जितं पुण्यं गृहाण।' इत्युक्त्वा आशिषं च दत्वा सः वृद्धः पत्न्या सह निजस्थानं गतः। सत्यम् एव उक्तम् 'यस्तु क्रियावान् पुरुषः स विद्वान्।'

(xi) पाणिनिः संस्कृतस्य महान् वैयाकरणः आसीत्। पाणिनेः जन्म खिस्तपूर्व सप्तमशताब्दयाम् शलातुरग्रामे अभवत्। अतः तस्य 'शलातुरीयः' इति नाम अपि प्रसिद्धम् अस्ति। वर्तमानकाले पाकिस्तानदेशे स्थितः लहुरनामकः ग्राम एव शलातुर ग्रामः अस्ति। पाणिनेः मातुः नाम दाक्षी आसीत् अतएव सः दाक्षीपुत्रः इत्यपि कथ्यते। 'पणिनः' इति तस्य पितुः नाम आसीत् अतः तस्य नाम 'पाणिनिः' अभवत्। आचार्यः वर्षः पाणिनेः गुरुः आसीत्। पाणिनिः 'तक्षशिला' विद्यापीठे शिक्षां प्राप्तवान्।

**25. एक शब्द में उत्तर दें—** 1×25=25

(a) संस्कृत वर्णमाला में कुल कितने वर्ण हैं?

(b) 'अच्' प्रत्याहार में कुल कितने वर्ण हैं?

(c) 'व' का उच्चारण-स्थान क्या है?

(d) व्यंजन वर्णों को क्या कहा जाता है?

(e) 'गजः' में कौन-सा प्रत्यय है?

(f) 70 को संस्कृत में क्या कहते हैं?

(g) 'स्वजते' किस लकार में है?

(h) 'गम' का प्रेरणार्थक रूप क्या होगा?

(i) 'उत्तरति' में कौन-सा उपसर्ग है?

(j) 'गन्तुम्' में कौन-सा प्रत्यय है?

(k) कोकिल + टाप = ?

(l) 'वासुदेवः' में कौन-सा प्रत्यय है?

(m) वि + हा + ल्यप् = ?

(n) 'परश्वः' का क्या अर्थ है?

(o) 'चपला मूषिका तीव्रं धावति' इस वाक्य में 'तीव्रं' क्या है?

(p) 'व्रीडा' का क्या अर्थ है?

(q) 'ऋजु' का प्रतिलोम क्या होगा?

(r) कर्त्ता की अत्यन्त इच्छा जिस कार्य में हो, उसमें कौन-सी विभक्ति लगती है?

(s) संबोधन में किस विभक्ति का प्रयोग होता है?

(t) 'करे गृहीत्वा कथितः' में 'करे' किस कारक सूत्र के कारण हुआ?

(u) 'उपनगरम्' में कौन-सा समास हुआ है?

(v) कर्मवाच्य में कर्त्ता में कौन-सी विभक्ति लगती है?

(w) 'क्त्वा' प्रत्यय का प्रयोग किस प्रकार की क्रिया बनाने में होता है?

(x) प्रदेशों के नाम किस वचन में व्यवहृत होते हैं?

(y) संस्कृत में 'प्रथम पुरुष' हिन्दी के किस पुरुष को कहा गया है?

## अभ्यासार्थ प्रश्नों के उत्तर

1. (a) दुर् (b) उत् (c) निर् (d) अव
2. (क) (a) उत् + ज्वलः (श्चुत्व संधि) (b) दिक् + अम्बरः (जशत्व संधि)
   (c) हरिम् + वन्दे (अनुस्वार)
   (ख) (a) धनुष्टंकारः (ष्टुत्व) (b) रामोऽयम् (उत्व)
   (c) मनोहरः (उत्व)
3. (क) (a) कृष्णस्य समीपम् — अव्ययीभावः
   (b) चन्द्रः शेखरे यस्य सः— बहुव्रीहिः
   (ख) (a) मातापितरौ— द्वन्द्वः
   (b) ग्रामगतः — तत्पुरुषः
4. (a) द्वितीया विभक्ति — अभितः के योग में
   (b) तृतीया विभक्ति — अंगविकार के योग में
5. (a) पठ् + शतृ (b) कृ + तव्यत्
6. (a) भक्तिमान् (b) कृतिः
7. (a) हरिणा (b) युष्मासु (c) ययोः
8.

| | धातु | लकार | पुरुष | वचन |
|---|---|---|---|---|
| (a) | इष् | विधिलिंङ् | उत्तम | एकवचन |
| (b) | नृत् | लृट् | प्रथम | बहुवचन |
| (c) | सेव् | लट् | मध्यम | बहुवचन |

9. इ, ई, चवर्ग, य् एवं श् वर्णानाम् उच्चारणस्थानं तालु अस्ति।
10. (a) पञ्चदशाधिकशतम् (b) एकत्रिंदशाधिकद्विशतम्
11. (a) प्राप्नुवन्ति (b) अस्ति
12. (a) 'सरोवरः' इत्यस्य 'तडागः' पर्यायपदम्।
    (b)'वृथा' इत्यस्य 'व्यर्थः' पर्यायपदम्।
    (c) 'भार्या' इत्यस्य 'स्त्री' पर्यायपदम्।
    (d) 'जननी' इत्यस्य 'माता' पर्यायपदम्।
13. (a) बालकाः गच्छन्ति। (b) तत्र एकः अध्यापकः वर्तते।
    (c) प्रखरः सर्पं दृष्ट्वा अवदत्। (d) तूष्णीं भव।
    (e) रावणः रामस्य रिपुः आसीत्। (f) जनाः हट्टं गच्छन्ति।
    (g) विद्यालयम् उभयतः वृक्षाः सन्ति। (h) अस्माकम् देशः भारतवर्षम् अस्ति।
    (i) सा अद्यैव अत्र आगता। (j) कृषकाः सूर्योदयात् पूर्वं जगन्ति।
14. (a)–(ii) (b)–(i) (c)–(v) (d)–(vi)
    (e)–(iv) (f)–(vii) (g)–(iii)
15. (a) संस्कारः (b) अभिज्ञानम् (c) निष्क्रमणम् (d) उन्नयनम्
    (e) आधानम् (f) पालयन् (g) प्रसन्नता (h) समाविष्टाः
    (i) प्रवेशः (j) उपदिश्य (k) उत्कृष्टम् (l) पाठः
    (m) मूलः (n) कृतवान् (o) कृत्वा

www.classroomnotes.in

16. (a) कर्मणि वीरः — सप्तमी तत्पुरुषः
(b) निजः उत्साहः तेन — कर्मधारयः
(c) विहारः चासौ राज्यम् तस्य — कर्मधारयः
(d) नवीना दृष्टिः यथा सम्पन्नः — तृतीया तत्पुरुषः
(e) क्लिष्टं जीवनं येषां ते — बहुव्रीहिः
(f) दलितश्चासौ बालकः तम् — कर्मधारयः
(g) न कृतः कालस्य क्षेपः येन सः — बहुव्रीहिः
(h) पुरुषः सिंह इव, तम् — कर्मधारयः
(i) शिक्षया विहीनाः — तृतीया तत्पुरुषः
(j) कुत्सिताश्च ताः रीतयः — कर्मधारयः
(k) न व्यापकता — नञ् समासः
(l) धर्मस्य उद्धारकाः — षष्ठी तत्पुरुषः
(m) वैषम्यस्य निवारकाः — षष्ठी तत्पुरुषः
(n) न किञ्चित् कर्तुं समर्थः — नञ् समासः
(o) मूर्तेः पूजा — षष्ठी तत्पुरुषः
(p) धर्मस्य आडम्बरः — षष्ठी तत्पुरुषः
(q) प्रज्ञा चक्षुः यस्य तस्य — षष्ठी तत्पुरुषः
(r) जातिवादेन कृतम् — तृतीया तत्पुरुषः

17. (a) स्ना + क्त (b) प्र + सृ + णिच् + ल्यप्
(c) दा + तव्यत् (d) स्ना + क्त्वा
(e) परा + अय् + तुमुन् (f) वच् + क्त्वा
(g) चन्त् + शतृ (h) मृ + क्त
(i) सम् + प्र + आप् + क्त (j) उप् + गम् + ल्यय्
(k) धृ + क्त

18. (a) यदि (b) एव (c) इव (d) अपि (e) च

19. 1. पूषन् + अपावृणु 2. जन्तोः + निहितः
3. न + अनृतं 4. हि + आप्तकामा
5. पुरुषम् + उप + एति 6. गङ्गायाः + तीरे
7. काल + अन्तरेण 8. अति + उत्कृष्टा + आसीत् + इति
9. अव + उपवर्षवर्षौ + इह 10. पाणिनिपिङ्गलौ + इह
11. उत्सवाः + च 12. नगरे + अस्मिन्
13. पटना + इति 14. निः + गतः
15. किम् + च 16. इति + एते
17. अद्य + अवधि 18. दुर्गतेभ्यः + अनाथेभ्यः + च
19. अलसेभ्यः + अपि + अन्नवस्त्रे 20. ततः + अलसपुरुषाणाम्

20. 1. तिस्रः स्त्रियः गच्छन्ति। 2. तस्मै पुस्तकं देहि।
3. सा गृहं गता। 4. भगवतः कृपा अस्ति।
5. सः व्याघ्रात् बिभेति। 6. सीता अतीव सुन्दरी आसीत्।

www.classroomnotes.in

7. रामश्यामौ गच्छतः।
8. चत्वारि फलानि सन्ति।
9. पुत्रेण सह पिता गच्छति।
10. चतस्रः बालिकाः पठन्ति।
11. द्वे फले पततः।
12. तया वाराणस्यां दृष्टम्।
13. वधूः श्वशुरात् जिलेति।
14. तया फलं खादितम्।
15. त्वया चन्द्रः दृश्यते।
16. मम मनसि चिन्ता अस्ति।
17. रामः अस्माकं मित्रम् अस्ति।
18. अयं समुद्रः अस्ति।
19. इमे शकुन्तला सीता च स्तः।
20. अष्टौ फलानि सन्ति।

21. **(i) वैद्य-रोगी सम्भाषणम्**

| | |
|---|---|
| वैद्यः | भो प्रखरः! त्वं कथम् असि? |
| रोगीः | अहं कुशलो नास्मि। |
| वैद्यः | कः भूयात्? |
| रोगीः | ज्वर पीड़ितोऽस्मि। |
| वैद्यः | अहं तु त्वं ज्वरौषधिं दास्यामि। |
| रोगीः | धन्यवाद महोदयाः। |

**(ii) क्रीडाविषये सम्भाषणम्**

| | |
|---|---|
| प्रवरः | प्रखर ! त्वं कुत्र गच्छसि? |
| प्रखरः | अहम् उद्यानं प्रति गच्छामि। |
| प्रवरः | किमर्थम्? |
| प्रखरः | क्रीडार्थम् |
| प्रवरः | प्रातः काले क्रीडनं मह्यम् अपि रोचते। |
| प्रखरः | तर्हि भवान् मया सह एव चलतु। |
| प्रवरः | नहि, अहं स्व पित्रा सह उपवने गच्छामि। |
| प्रखरः | उचितम्, श्वः आवां सदैव प्रातः क्रीडार्थम् उद्यानं गमिष्यावः। |

**(iii) कक्ष्यायां छात्राणां सम्भाषणम्**

| | |
|---|---|
| वशीमः | नदीम! त्वं किं करोषि? |
| नदीमः | अहं संस्कृतम् पठामि। |
| वशीमः | श्वः सायंकाले भवतः कुत्र मिलिष्यति? |
| नदीमः | श्वः सायंकाले अहं स्वगृहे मिलिष्यामि। |
| वशीमः | नदीम! भवान् असत्यं वदति किम्? |
| नदीमः | भवान् जयपुरं गमिष्यति। पर श्वः आगमिष्यति। |
| वशीमः | अहं विस्मृतः। |
| नीरजः | किशन। अद्य मम गृहम् आगच्छतु। सम्यक् पठिष्यावः। |
| किशनः | भवन्तः मम गृहम् आगच्छन्तु। सर्वे मिलित्वा क्रीडष्यामः। |

**(iv) माता-पुत्रयोः सम्भाषणम्**

| | |
|---|---|
| माता : | रामानुज! किं करोषित्वम्? |
| पुत्रः | संस्कृतं पठामि माते! |
| माताः | भोजनं कृतः? |
| पुत्रः | आम्। |

माताः आपणं गच्छसि किम् ?

पुत्रः माते ! शीघ्रं गच्छामि। किम् आनयामि ततः ?

### (v) गुरु-शिष्ययोः संवादः

गुरुः भवतः किं नाम अस्ति ?

शिष्यः महोदय ! मम नाम संजीवः अस्ति।

गुरुः भवान् कुतः आगच्छति ?

शिष्यः अहं पाटलिपुत्र नगरात् आगच्छामि।

गुरुः तव पितुः किम् नाम अस्ति ?

शिष्यः महोदय ! मम पितुः नाम श्री महेन्द्र सिंहः अस्ति।

गुरुः किं त्वं पठसि ?

शिष्यः आम् ! अहं महाविद्यालये पठामि।

### (vi) उद्याने वार्तालापः

रणधीरः रणवीर ! त्वं कुत्र गच्छसि ?

रणवीरः अहम् उद्यानं प्रति गच्छामि।

रणधीरः किमर्थम् ?

रणवीरः भ्रमणार्थम्।

रणधीरः प्रातःकाले भ्रमणं मह्यं अपि रोचते।

रणवीरः तर्हि भवान् मया सह एव चलतु।

रणधीरः बाढम्। अहं अपि चलामि।

### (vii) पर्यावरणस्य रक्षणम्

पूजाः भो प्रिये ! त्वं किं पश्यसि ?

प्रियाः एतान् वृक्षान् पश्यामि।

पूजाः एतान वृक्षान् के आरोपितवन्तः ?

प्रियाः अस्माकं अग्रजाः मानवाः।

पूजाः अस्माकम् अपि कर्त्तव्यं वर्तते वयं अपि पादपान् रोपयाम

प्रियाः त्वं सत्यं कथयसि।

पूजाः किं त्वं फलानि खादितुम इच्छथ ?

प्रियाः आम्।

पूजाः तर्हि त्वं गर्तानि निर्माय एकं फलपादपम् आरोपयत।

### (viii) नगर-भ्रमणम्

संजीव भान्द्राः संजय ! त्वं भ्रमणाय कुत्र गमिष्यसि ?

संजय भान्द्राः गुलाबीनगरं गमिष्यामि।

संजीव भान्द्राः कदा ?

संजय भान्द्राः ग्रीष्मावकाशे।

संजीव भान्द्राः कस्मिन् यानेन् ?

संजय भान्द्राः मोटरेन्

संजीव भान्द्राः गुलाबी नगरस्य निर्माणं कः अकरोत् ?

संजय भान्द्राः महाराजः जयसिंहः।

**(ix) नवीन मित्रस्य परिचयः**

सरोवरः नमो नमः, भवतः किं नाम अस्ति ?
विभवः मम् नाम विभवः अस्ति।
सरोवरः किं तव प्रियविषयम् ?
विभवः संस्कृतः।
सरोवरः भवान् कुत्र गच्छति ?
विभवः अहं शफापुरं गच्छामि।
सरोवरः कथम् ?
विभवः आम्रं खादितुम।

**22. (i)** महेशवाड़ातः
15 मई, 2010
श्रद्धेयेषु मातृचरणेषु
सादरं वन्दनानि।
अत्रं कुशलंतत्रास्तु।

भवत्याः स्नेहापूरितपत्रं अद्यैव प्राप्तम्। पत्रं पठित्वा गृहस्य सर्वमपि वृत्तं ज्ञातवती। अस्माकं छात्रावासस्य अधीक्षिका नित्या, गम्भीरा कुशलिनी चास्ति। सा छात्रासु स्निहयति। यथा समयं हितान् संरक्षति। अस्माकम् अध्ययनं सम्यक् प्रचलति। अतः, भवत्या कोऽपि चिन्ता न विधेया, अर्द्धवार्षिकीं परीक्षाम् अनन्तरम् अहं शीघ्रमेव गृहम् आगमिष्यामि।

पितृ चरणयोरपि ममाभिवादनम्। शेषं सर्वं कुशलम्। भवत्याः पत्रोत्तरं प्रतीक्षायाम्।

भवत्याः पुत्री
ऋया प्रकाशः

डाक टिकटम्

सेवायाम्,
श्रीमती नन्दिता प्रकाशः
ग्रा०+पो०– वासुदेवपुरः
जिला–गांधीनगरः
पिन–820 043

**(ii)** 16 मई, 2010
सकाशात्
देवेन्द्रः जैन, पार्षदः
देवनगरं, सीकरम्
सविधे,
श्रीमन्तः नगरपालिकाप्रशासक महोदयाः
नगरपालिका, सीकरम

**विषय**—देवनगरस्य स्वच्छता सम्पदानार्थम्।

महोदयाः,

निवेदनमस्ति यद् अस्माकं 'देवनगरम्' नामके उपनगरे स्वच्छताकार्यं नैव क्रियते।

www.classroomnotes.in

अनेन कारणेन यत्र-तत्र अस्वच्छवस्तूनां अनियत प्रसरणं भवति। अनेन विविधरोगाणां प्रसारस्य आशंका अस्ति।

अतएव प्रार्थ्यते स्वच्छताकार्ये नियुक्तान् कर्मकरान् स्वच्छतासम्पादनार्थं आदिशतु। आशासे, भवान् समुचितां व्यवस्थां करिष्यति।

निवेदक :
देवेन्द्र : जैन

**(iii)** 18 मई, 2010
सेवायाम्
श्रीमन्तः प्रधानाचार्याः महोदयाः,
राजकीयः उच्चमाध्यमिकः विद्यालयः,
जयपुरः

**विषय**—दिनद्वयस्य अवकाशार्थम् प्रार्थनापत्रम्।

महोदयाः,

सविनयं निवेदनम् अस्ति यत् अहम् अद्य तीव्रज्वरेण पीडितोऽस्मि। अतः, विद्यालयम् आगन्तुम् असमर्थोऽस्मि।

अतः, प्रार्थना अस्ति यत् भवन्तः द्विदिवसयोः अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति।

भवतामाज्ञाकारी शिष्यः
अभिषेकः
कक्षा–दशम
क्रमांक–04

**(iv)** 19 मई, 2010
अभिषेकः
कक्षा दशम्
राजकीय उच्च माध्यमिक विद्यालयः
नांगलराजावतान, दौसा (राजस्थानम्)
श्रीमान् निदेशक महोदयः
राजस्थान संस्कृत अकादमी
जयपुरम्

**विषय**—संस्कृत व्याकरणक्रयण सन्दर्भे।

महोदयः,

राजस्थान संस्कृत अकादमी द्वारा प्रकाशितः 'संस्कृतव्याकरण' नामको पुस्तकम् मयाऽवलोकितः। कृपया, व्याकरणस्य पंच प्रतीः प्रेषयितुं व्यवस्थां कुर्वन्तु इति निवेदयामि। एतदर्श द्विशतमूरूप्यकाणि अग्रिमरूपेण प्रेषयामि। पुस्तकप्राप्तिसमयेऽवशिष्टं धनमप्यहं प्रेषयिष्ये।

सधन्यवादम्।

भवदीयः
अभिषेकः
कक्षा – दशम
क्रमांक – 14

www.classroomnotes.in

(v) 275-B रामनगरं
अलवरम्
27 मई, 2010
पूज्येषु पितृपादेषु,
सादरं प्रणामाञ्जलयः।

अत्र सर्वे कुशलिनः, तव कुशलं सदैव इच्छामि। भवदीय पत्रं मया अद्य एवं प्राप्तम्। भवतां निर्देशानुसारं स्वाध्ययनम् अहं नियमितकरोमि। अहं प्रतिदिनं विद्यालये पाठित विषयाणाम् अध्ययनं करोमि। प्रतिदिनं प्रातः पञ्चवादने उत्थाय नित्यकर्म च कृत्वा पठने संलग्नो भवामि। रात्रौ दशवादन पर्यन्तम् अध्ययनं करोमि। विद्यालये अपि प्रतिदिनं गच्छामि। एवं प्रकारेण अहं स्वाध्ययने दत्तचित्तोऽस्मि। अत्र मम अध्ययनं सम्यकं प्रचलति। समविभागचक्रानुसारं पठनं करोमि।

मातृचरणाभ्याम् मे प्रणामाञ्जलिः स्वीकार्याः। अनुजादिकाश्च मे चिरंजीवन्तु इति अभिलषन्।
भवत्कः प्रिय पुत्रः
विवेकादनन्दः

डाक टिकटम्

सेवायाम्,
श्री श्यामसुन्दर प्रसाद
ग्रा०+पो० – नावकोठी
जिला –बेगूसराय
पिन – 851130

23. (क)

उत्तरम्—(अ) अस्माकं राजस्थानम्।

(ब) अस्माकं राजस्थानं वीराणां जनकं वर्तते। कवयः अपि काव्येषु अस्य गौरवगीतानि गायन्ति। राजस्थानस्य सभ्यतायाः उद्भवः विकासश्च मोहनजोदड़ो-हड़प्पादि सभ्यतानां समकालिकं सिध्यति। पुरातात्त्विक साक्ष्यैः सिध्यति यत् नदीनां तटेषु निवासिनो मानवाः युगस्य आयुधैः मृगयां कुर्वन्ति स्म। ऋग्वेदानुसारं राजस्थान प्रान्ते दृषवती सरस्वती च नद्यौ वहतः स्म। अयं भूभागः ब्रह्मावर्त नाम्ना कथ्यते स्म।

(स) (i) अस्माकं राजस्थानं वीराणां जनकं वर्तते।

(ii) राजस्थानस्य सभ्यता मोहनजोदड़ो-हड़प्पादि सभ्यतानां समकालिकं सिध्यति।

(iii) लक्षवर्षेभ्यः प्राक् राजस्थानस्य दक्षिण भागे बनास गम्भीरी बेड़चादि नद्यः वहन्ति स्म।

(iv) नदीनां तटेषु निवासिनो मानवः प्रस्तरयुगस्य आयुधः मृगयां कुर्वन्ति स्म।

(v) प्रस्तर सभ्यताया चिन्हानि चर्मण्वत्यादिनदीनां समीपे समुपलब्धानि।

(ख)

उत्तराणि—(अ) अस्य गद्यांशस्य समुचितं शीर्षकं 'दीपावली'।

(ब) संक्षिप्तीकरणं—भारतदेशे दीपावली सर्वेषां जनानां कृते विशेषोत्सवः मन्यते। यदा रामः चतुर्दशवर्षाणां वनवासं कृत्वा अयोध्यां प्रति पुनः आगतवान् तदा अयोध्यावासिनः

तेषां स्वागतार्थ अयोध्यायां सर्वत्र दीपान् प्रज्वालितवन्तः, गृहेषु च मिष्टान्नानि निर्मितवन्तः। तदारभ्य एव एषः उत्सवः प्रतिवर्षं सर्वत्र आयोज्यते।

(स) (i) दीपावल्याः अवसरे सर्वे जनाः परस्परं भेदभावं विस्मृत्य आनन्दमग्नाः भवन्ति।

(ii) राज्ञा दशरथेन स्वपुत्राय रामाय वनवासः कल्पितः आसीत्।

(iii) दीपावल्याः अवसरे जनाः स्वमित्रेभ्यः बन्धुभ्यश्च उपहारान् यच्छन्ति।

(iv) सर्वे सर्वेभ्यः सुखाय समृद्धये च शुभेच्छाः ज्ञापयन्ति।

(v) श्रीरामः अस्मिनएव दिने अयोध्यां प्रत्यावर्तितवान।

(ग)

उत्तराणि—(अ) विज्ञानस्य महत्वम्।

(ब) संक्षिप्तीकरणम्—'विशिष्टं ज्ञानं विज्ञानम्' इति कथनानुसारेण अस्मिन् वैज्ञानिकयुगे विज्ञानस्य महत्त्वं सर्वत्र परिदृश्यते। दैनिक जीवनेऽपि मानवस्य कृते आधुनिकयन्त्राणामावश्यकता भवति। मानवः अस्मिन् युगे विनाशाय उन्नत्यै च नूतनानामविष्काराणां प्रयोगं करोति। मानवकल्याणार्थमेव एषां प्रयोगः करणीयः।

(स) (i) विज्ञानप्रधानम युगम्।

(ii) विशिष्टं ज्ञान विज्ञानम् कथ्यते।

(iii) वैज्ञानिकैरनेके आविष्काराः विहिता।

(iv) परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः।

(v) परमाणुशक्तेः लोकध्वंसकार्यम् एव।

**24. हिन्दी में अनुवाद**

(i) हमारे देश में कुम्भ के मेलों का अत्यधिक महत्त्व है। देश के चार स्थानों पर कुम्भ के मेले आयोजित होते हैं—प्रयाग में, हरिद्वार में, उज्जयिनी में और नासिक में। प्रत्येक नगर में बारह वर्षों के बाद एक पूर्ण कुम्भ का योग आता है। इस प्रकार तीन वर्ष के बाद क्रमशः देश के एक स्थान पर कुम्भ का मेला होता है। प्रत्येक नगर में छठे वर्ष में अर्द्धकुम्भ का योग भी होता है। कुम्भ का मेला प्रायः डेढ़ माह तक चलता है। कुम्भ के मेले में भाग लेने के लिए भारत देश के अनेक स्थानों से सामान्य लोग, साधु और सन्त आते हैं।

(ii) नारी पुरुष की सहयोगिनी होती है, वही घर की स्वामिनी होती है। पत्नी के साथ ही पुरुष यज्ञ करता है, इसलिए पत्नी को सहधर्मचारिणी भी कहा जाता है। वह पुरुष की 'अर्धाङ्गिनी' भी कही जाती है। राम की पत्नी सीता थी। भगवान विष्णु की पत्नी देवी लक्ष्मी है। शिव की पत्नी का नाम पार्वती है। महात्मा गाँधी महोदय की पत्नी कस्तूरबा थी।

(iii) मैं प्रतिवर्ष पुष्कर जाता हूँ। वहाँ, ब्रह्माजी के मन्दिर को देखता हूँ। सरोवर में स्नान करता हूँ और पूजा करता हूँ। मेरे साथ मेरे मित्र भी जाते हैं। वे भी मन्दिर के दर्शन करते हैं, स्नान करते हैं और पूजा करते हैं। पिछले वर्ष मेरे साथ शिव भी पुष्कर गया था, अन्य भी बहुत से लोग गये थे। हम सबने मन्दिरों के दर्शन किये, स्नान और पूजा की। अगले वर्ष भी मैं पुष्कर जाऊँगा, मन्दिरों के दर्शन करूँगा, स्नान करूँगा और पूजा करूँगा।

(iv) हमारे देश का नाम भारतवर्ष है। यह भरत का देश है। इसलिए भारत नाम से प्रसिद्ध है। ऋषभ का पुत्र भरत वीर था। उसके नाम से यह देश 'भारत' है। भरत के कुल में उत्पन्न हुए वे भी भारतीय हैं। भारतीयों का देश भारत है। शकुन्तला और

दुष्यन्त के पुत्र का नाम भी भरत था। वह भी चक्रवर्ती सम्राट् था। प्रजा के भरण-पोषण करने से मनु भी भरत कहे जाते हैं।

(v) नासिक महाराष्ट्र में गोदावरी नदी के किनारे स्थित है। यहीं पर 'पंचवटी' नामक स्थान भी है। वनवास काल में राम ने सीता और लक्ष्मण के साथ पंचवटी में ही निवास किया था। पास में ही गोदावरी नदी का उद्गम (उत्पत्ति) स्थल है। वहाँ पर 'त्रयम्बकेश्वर' नाम का प्रसिद्ध ज्योतिर्लिंग है। इस स्थान का नाम भी त्रयम्बकेश्वर है। भारतवर्ष में कुम्भ मेलों का और कुम्भ स्थानों का सांस्कृतिक महत्त्व है।

(vi) मेवाड़ राज्य अनेक वीरों की जन्मभूमि है। बप्पारावल, महाराणा कुम्भा, महाराणा संग्राम सिंह, महाराणा उदयसिंह इत्यादि क्रमशः मेवाड़ राज्य के राजा थे। महाराणा प्रताप का जन्म विक्रम सं.1597 वर्ष में (1540 ई. वर्ष में) ज्येष्ठ शुक्ल तृतीया को हुआ।

(vii) उसी समय ही किसी वृद्ध ने अपनी पत्नी के साथ नदी से पार जाने के लिए नदी में प्रवेश किया; किन्तु अत्यधिक प्रवाह के कारण बह गया। वह वृद्ध हाहाकार करके गाँव के लोगों को बुलाने लगा—मेरी रक्षा करो, मेरी रक्षा करो। हे महापुरुषो। नदी का प्रवाह मुझे और मेरी पत्नी को जबरदस्ती ले जा रहा है। कोई भी धार्मिक पत्नी सहित मेरे प्राणों की रक्षा करो। परन्तु दीन की कातर आवाज को सुनकर सभी गाँव के लोग आश्चर्यपूर्वक देखते हैं, कोई भी अपनी जगह से नहीं चलता है कोई भी जल के मध्य में प्रवेश करके वृद्ध और उसकी पत्नी के प्राणों की रक्षा नहीं करता है।

(viii) प्राचीन समय में भारत देश में मगध राज्य में नन्दवंश का साम्राज्य था। मगध साम्राज्य की राजधानी पाटलिपुत्र थी। इस साम्राज्य में बुद्धिमान् मन्त्री, कर्त्तव्यनिष्ठ कर्मचारी, गुणवान् पण्डित तथा शक्तिमान-सैनिक थे। नगर का वैभव भी उत्कृष्ट था। राज्य में उत्तम कृषि कार्य चलता था। इसलिए नागरिक धनवान थे। शिक्षण-व्यवस्था भी अत्यधिक उत्कृष्ट थी। इसी राज्य में विश्वप्रसिद्ध नालन्दा विश्वविद्यालय था। राज्य में बहुत से वर्षों तक शासन-व्यवस्था उत्तम रीति से चलती थी। इसके बाद नन्दवंश में उत्पन्न घनानन्द राजा हुआ था। वह अत्यधिक स्वार्थी और इन्द्रियों के वश में रहनेवाला था। राज्यकार्य में उसकी रुचि नहीं थी। इसलिए मगध राज्य समस्याग्रस्त हो गया। उससे सभी नागरिक चिन्तित हो गए।

(ix) और अन्त में पैर में असावधानी के कारण धनुष की प्रत्यञ्चा के आघात से महाराणा प्रताप अस्वस्थ हो गए। सन् 1597 ई. में जनवरी महीने की 19 तारीख को महाराणा प्रताप का स्वर्गवास हो गया। प्रताप महान सेनानायक, जननायक, व्यवस्थापक और संगठनकर्ता थे। उन्होंने अपने आचरण से अपने सैनिकों को कर्तव्यनिष्ठ प्रजाजनों को निर्भय और अपने शौर्य से शत्रुओं को भयभीत किया। आज भी भारतवासी प्रताप के वीरतापूर्ण गीत गाते हैं।

(x) तब विक्रम उसे अभयदान देकर नदी के पानी में प्रवेश करके पत्नी के साथ उस वृद्ध को महा प्रवाह से खींचकर किनारे पर लाया। वृद्ध भी स्वस्थ होकर विक्रम से बोला, "हे महापुरुष! मेरा यह शरीर मेरे माता-पिता द्वारा उत्पन्न किया गया है, इस समय आपके पास से दूसरा जन्म प्राप्त किया है। इसलिए तुम मेरे द्वारा अर्जित पुण्य को ग्रहण करो।" ऐसा कहकर और आशीर्वाद देकर वह वृद्ध पत्नी के साथ अपने स्थान पर चला गया। सही ही कहा गया है—"जो पुरुष क्रियाशील होता है वही विद्वान है।"

(xi) पाणिनि संस्कृत के महान् वैयाकरण थे। पाणिनि का जन्म ईसा पूर्व सातवीं

शताब्दी में शलातुर नामक गाँव में हुआ था। इसीलिए उनका 'शलातुरीय' ऐसा नाम भी प्रसिद्ध है। वर्तमान समय में पाकिस्तान देश में स्थित लहुर नामक गाँव ही शलातुर गाँव है। पाणिनि की माता का नाम दाक्षी था, इसलिए वह 'दाक्षी-पुत्र' भी कहा जाता है। 'पणिन' ऐसा उनके पिता का नाम था, इसलिए उनका नाम 'पाणिनि' हुआ। आचार्य वर्ष पाणिनि के गुरु थे। पाणिनि ने 'तक्षशिला' विद्यापीठ में शिक्षा प्राप्त की थी।

**25.** (a) 50 (b) 9 (c) दन्तोष्ठ
(d) हल् (e) सुप् (f) सप्ततिः
(g) लट् लकार (h) गमयति (i) उत्
(j) तुमुन् (k) कोकिला (l) अण्
(m) विहाय (n) परसों (o) क्रिया विशेषण
(p) लज्जा (q) वक्रः (r) द्वितीया
(s) प्रथमा (t) अवच्छेदे सप्तमी (u) अव्ययीभावः
(v) तृतीया (w) पूर्वकालिक (x) बहुवचन
(y) अन्यपुरुष

★★★

www.classroomnotes.in